# શ્રીગણેશપઞ્ચાશન્નામસ્તોત્રમ્

Shri Ganesha Panchashat Nama Stotram Ganesha’s 50 Names

sanskritdocuments.org

May 24, 2019

# Shri Ganesha Panchashat Nama Stotram Ganesha’s 50 Names

# શ્રીગણેશપઞ્ચાશન્નામસ્તોત્રમ્

## Sanskrit Document Information

Text title : Shri Ganesha Panchashat Nama Stotram Ganesha’s 50 Names

File name : gaNeshapanchAshatnAmastotram.itx

Category : ganesha, panchAshat

Location : doc_ganesha

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Description/comments : See corresponding namavali

Latest update : May 24, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 24, 2019

*sanskritdocuments.org*

# શ્રીગણેશપઞ્ચાશન્નામસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
ઋષય ઊચુઃ ।
ગણેશો ગણનાથશ્ચ હેરમ્બો ગિરિશાત્મજઃ ।
પાર્વતીનન્દનો વીરો દેવરાજો ગજાનનઃ ॥ ૧॥

લમ્બોદરો વિઘ્નરાજો યોગી સદ્યોગલક્ષણઃ ।
અગ્રપૂજ્યશ્ચતુર્બાહુરેકદન્તો લિપીશ્વરઃ ॥ ૨॥

વ્યાઘ્રચર્માંમ્બરો ધીરઃ સદામઙ્ગલરૂપવાન્ ।
શુક્લાસ્યો મૂષિકારોહી કેવલો મોક્ષદાયકઃ ॥ ૩॥

પદ્મી દન્તકરો દન્તી વૈષ્ણવઃ પરમાર્થદૃક્ ।
પઞ્ચપાણિઃ પઞ્ચવક્ત્રઃ શિવઃ શઙ્કર ઈશ્વરઃ ॥ ૪॥

હરિગાતા નૃત્યકારી શિવપુત્રઃ સ્રવન્મદઃ ।
આનન્દાન્દોલિતમનાઃ શૈવો ધર્મો ધનેશ્વરઃ ॥ ૫॥

અનન્તો જગદાધારઃ શશિસૂર્યવિલોચનઃ ।
સમુદ્રપાતા સામુદ્રઃ સમુદ્રજઠરો યમઃ ॥ ૬॥

દિવ્યરૂપો વારિનાથો જયશ્ચ વિજયસ્તથા ।
નામાન્યેતાનિ પઞ્ચાશદ્ગણેશસ્ય પઠેન્નરઃ ॥ ૭॥

યાત્રાયાં પૂજને દાને શ્રાદ્ધે ગઙ્ગાવગાહને ।
પુત્રાદિમઙ્ગલે કાર્યે પ્રત્યહઞ્ચ ત્રિસન્ધ્યકમ્ ॥ ૮॥

શૃણુયાદ્યઃ ભક્તિયુક્તો વિઘ્નાસ્તસ્ય વિમૂર્છિતાઃ ।
પ્રત્યહં મઙ્ગલં તસ્ય ધનપુત્રાદિસમ્ભવમ્ ।
ઇષ્ટદેવમહાભક્તિદાયકં વાઞ્છિતાર્થદમ્ ॥ ૯॥

ઇતિ શ્રીગણેશપઞ્ચાશન્નામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shri Ganesha Panchashat Nama Stotram Ganesha's 50 Names*

pdf was typeset on May 24, 2019

Please send corrections to *sanskrit@cheerful.com*